मेरुलङ्घनात् । असंख्यातं तथा जप्तं तत्सर्वं निष्फलं भवेत्” मदनपारिजाते तु मध्यमाया इयं पर्वेतिपाठः । आ०त० शङ्खः । “तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्विका । अनामामध्यमारभ्य जप एवमुदाहृतः” काम्ये मालाऽभावे एवाङ्गुल्याद्युक्ता नित्ये तु सर्वथैव या-द्युक्ता यथाह योगिनीत० । “नित्यं जपं करे कुर्य्यान्न काम्यमवरोधनात् । काम्यमपि करे कुर्य्यात् मालाऽभावे प्रियंवदे ! । तत्राङ्गुल्या जपं कुर्य्यात् साङ्गुष्ठाङ्गुलिभि-र्जपेत् । अङ्गुष्ठेन विना कर्म कृतं तन्निष्फलं भवेत्” उत्पत्तितन्त्रे १प० “नित्यं नैमित्तिकं काम्यं करे कुर्य्या-द्विचक्षणः । करमाला महादेवि ! सर्वदोषविवर्जिता । छिन्नभिन्नादिदोषोऽपि करे नास्ति कदाचन । अन्यथा तु करे देवि ! माला भवति तादृशी । ग्रन्थिः सा कुण्डली-शक्तिः पञ्चाशद्वर्णरूपिणी । अतएव महेशानि ! कर-माला महाफला” । ततश्च दक्षिणेनेति प्रागुक्तेः दक्षह-स्तपर्वभिरेव दशसंख्याजपः कार्य्यः । शतादिजपे तु दक्षिणहस्तेन कृतजपदशसंख्यायाः प्रत्येकं दशकसं-ख्यागणना वामहस्तस्थितनिर्द्दिष्टपर्व्वक्रमेण कार्य्या तथा च दशकस्य दशकेन गणने शतसंख्यापूर्त्तिः । अधिकाष्ट संख्या तु दक्षहस्तेनैव प्रागुक्तरीत्या कार्य्येति तत्त्वम् ।

**करमुक्त** न० करे स्थापयित्वा मुच्यते यत् मति क्षिप्यते मुच–क्त (बड्शी) अस्त्रभेदे हेमच० ।

**करम्ब** त्रि० कृ–कर्मणि अम्बच् । १मिश्रिते । भावे अम्बच् । २मिश्रणे पु० । हेमच० । ३करम्भे दृत्यमरटीकायां नीलकण्ठः

**करम्बित** त्रि० करम्बो मिश्रणं जातोऽस्य तार० इतच् । मिश्रिते “मधुकरनिकरकरम्बितेति” जयदेवः ।

**करम्भ** पु० केन जलेन रभ्यते सिच्यते रभ–घञ् मुम् च । १दधिमिश्रितसक्तुषु अमरः “धानावन्तं करम्भिणमपू-पवन्तम्” ऋ०३,५२,१, । “पूषण्वते ते चकृमा करम्भम्” ऋ०३,५२,७, “अलुषानिव यवान् कृत्वा तानीषद्विपतस्य करम्भपात्राणि तेषां कुर्व्वन्ति” शत० ब्रा० २,५,२,४, २उदमन्थे “धानाः करम्भः सक्तवः परिवापः पयो दधि” यजु० १९,२१, “करम्भः उदमन्थः” वेददी० । “रूपं बदरमुपवाका करम्भस्य” २२ । “करम्भादिति पूषणम्” ऋ०६,५६,१ । ३भ्रष्टयवमात्रे । “कामधियस्त्वयि रचिता न परमारोहन्ति यथा करम्भबीजानि” भाग० ३,२६,२७, “करम्भबीजानि भर्जितयवबीजानि” श्रीधरः । “करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्” मनुः । करम्भपाकार्थं वालुकावदातापोयेषु इति । “करम्भवालुका-तप्तामायसीश्च शिलाः पृथक्” भा० स्वर्गा० २अ० । निरयव-र्णने । द्रव्यावयववैषम्यात् ४मिश्रगन्धे । “करम्भपूतिसौ-रभ्यशान्तोग्राम्लादिभिः पृथक्” एकोविभिद्यते गन्धः” भाग० ३,२६,४२, “करम्भोमिश्रगन्धः” श्रीधरः । ५प्रियङ्गुवृक्षे ६यतावर्य्याञ्च राजनि० । स्वार्थे कन् करम्भक तत्रार्थे

**करम्भि** पु० यदुवंश्ये नृपभेदे । “करम्भिः शकुनेः पुत्रोदेव रातस्तदात्मजः” भाग० ९,२४,२,

**कररुह** पु० करे रोहति रुह–क । १नखे अमरः । वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैः” मेघ० । २कृपाणे च (तरवार)

**करर्द्धि** स्त्री करेण ऋद्धिर्यस्य । १करताल्याम् । त्रिका० ९त० । २हस्तसम्पत्तौ च ।

**करवी** स्त्री कस्य वायोः रवोऽत्र गौ० ङीष् । १हिङ्गुपत्रे करेण वीयते वी–क्विप् । २कवर्य्याञ्च त्रिका०

**करवीर** पु० करं वीरयति चु० वीर–विक्रान्तौ अण् । १कृपाणे खड्गे, २स्वनामख्याते वृक्षे, ४देशभेदे च मेदि० । ५श्मशाने, हेम० । ब्रह्मावर्त्ते दृषद्वतीनदीतीरस्थचन्द्रशेखरराजपुरे च । करवीरवृक्षभेदगुणाश्च भाव० उक्ता यथा । “करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः । द्वितीयोरक्तपुष्पश्च चण्डद्रोणः शुभस्तथा । करवीरद्वयं तिक्तं कषायं कटु-कञ्च तत् । व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् । वी-र्य्योष्णं क्रमिकण्डूघ्नं भक्षितं विषवन्मतम् ! । ७तीर्थभेदे । “करवीरपुरे स्नात्वा विशालायां कृतोदकः । देवह्रद उपस्पृश्य ब्रह्मभूतो विराजते” भा० अनु० २५ अ० । करवीरपुरञ्च चेदिदेशदक्षिणं गोमन्तपर्व्वतात् त्रिदिन गम्यमार्गे स्थितम् । यथोक्तं हरिवं० १००अ० “रार्मा प-राजयं युद्धे गोमन्तेऽचलसत्तमे । अवगाहारणाञ्चास्य स्वर्ग-लोकं व्रजन्ति ते । तत्गच्छाम महाराज ! करवीरं पुरोत्तमम् त्वयादिष्टेन मार्गेण चेदिराज । शिवाय च । ते स्यन्दनगताः सर्व्वे प्रवनोत्पातिभिर्हयैः । भेजिरे दीर्घमध्वानं मूर्त्ति-मन्त इवाग्नयः । ते त्रिरात्रोषिताः प्राप्ताः करवीरं पुरो-त्तमम् । शिवाय च शिवे देशे निविष्टास्त्रिदशोपमाः” तत्-पुराधीशश्च शृगालनामा नृपतिस्तद्वधाह तत्रैव १०१अ० “तानागतान् विदित्वाऽथ शृगालो युद्धदुर्म्मदः । पुरस्य ध-र्षणं मत्वा निर्जगामेन्द्रविक्रमः” ।

**करवीरक** पु० करवीर इव कायति कै–क । १अर्ज्जुनवृक्षे रा-जनि० स्वार्थे कन् । २करवीरार्थे । करं वीरयति ण्वुल् । ३खड्गे शब्दमा० । करवीरे भवः कन् । ४करवीरमूलज-